# उपसंहारः

# उपसंहारः

पुराणानां महत्त्वं जगती प्रसिद्धमस्ति। पुराणेषु यत्चरितं यत्कथानकं यच्चान्यत्किमप्यास्ति तत्सर्वं वेदादेव समागतंमिति।

विषयेऽस्मिन् सर्वेः विद्वदभिः मन्यते। पुराणानां यदाध्ययनं क्रियते तदा परिज्ञायते यत् ज्ञानविज्ञानस्य भाण्डारम् पुराणमिति। अस्य वाङ्गमयस्य स्वातन्त्र्येण प्रतिपुराणम् अद्यापि बहुविधकार्यम् भवति। मया पुराणेषु ज्योतिषरहस्यम्, कर्मकाण्डस्य च किम् रहस्यं इत्यनयोः विमर्शः करणीयः इति सच्चिन्त्यैव ''ज्योतिष-कर्मकाण्डयोः विमर्शः'' इति विषयः स्वीकृत्य शोधयात्रा पूर्णाङ्गताः। अस्मिन् महाप्रबन्धे विषयाणाम् विभाजनं अनेन प्रकारेण कृतम्। यथा -- ज्योतिषस्य स्वरूपं संस्कृतवाङ्गमये कथमस्ति, तस्मिन् विषये वेदतः आरभ्य पुराणपर्यन्तम् अध्ययनं कृतमस्ति। ततः कर्मकाण्डस्यापि वेदादिषु कीदृकस्वरूपं इत्याधारीकृत्य उभयोः तत्त्वानां विमर्शः ततः अनयोः विषयोः समीक्षाऽपि अत्र विहिता वर्तते।

विषयविभाजनं प्रायेण एवं प्रकारेण कृतं यत् उभयोः विषयोः सर्वाङ्गीण रूपं अध्ययनं स्यात।

शोधविषयस्य विषयः पञ्चषु अध्यायेषु विभक्तमस्ति।

**प्रथमेऽध्याये** संस्कृत वांङ्गमये ज्योतिषविमर्शः स्पष्टीकृतः तत्र पुराणसाहित्यस्य परिचयः अस्ति पुराणेषु ज्योतिषशास्त्रस्य विवेचनम् कुत्रास्ति इति निर्दिष्टम्। ततः संस्कृतवाङ्गमये कर्मकाण्डस्य विमर्शः उल्लिखितः। पुराणेषु ज्योतिषतत्त्वानां स्वरूपं निरूपणं च अस्ति।

**द्वितीयेऽध्याये** वेदेषु कर्मकाण्ड विवेचनम् कीदृशं अस्ति इति विविच्य चतुर्णाम् वेदानां ब्राह्मणग्रंथेषु, उपनिषत्सु च कर्मकाण्डविषयिकी चर्चा तद् रहस्यं च किम् अस्ति इत्यस्य सांगोपांग निरूपणं अत्र विहितं वर्तते। अनेन सह कर्मकाण्डस्य उल्लेखः सूत्रग्रंथेषु कीदृशं अस्ति इति निरूपणं अस्ति। तदुपरान्ते महाभारते कर्मकाण्डस्य किम् स्वरूपम् पुराणेषु च कर्मकाण्ड विमर्शः स्पष्टीकृतः वर्तते।

**तृतीयेऽध्याये** ज्योतिषकर्मकाण्डयोः पुराणेषु निरूपणं अस्ति। प्रथमेहि ग्रहाणां निरूपणं, नक्षत्राणां निरूपणं तत्शान्त्यर्थम् कर्मकाण्डीयं किम् विधानं इति वर्णनमस्ति। महापुराणेषु योगः, करणानि, तिथ्यादीनाम् च कर्मकाण्डीयदृष्ट्या के शमनोपायाः सोदाहरणं उपस्थापिताः सन्ति।

**चतुर्थेऽध्याये** पुराणेषु संस्कारणां विवेचनं ज्योतिषे मेलापकं तत्र कर्मकाण्डीय विमर्शः अपि च और्ध्वदैहिक-क्रियायाः पौरोहित्ये के प्रयोगाः तत् शास्त्रीयाधाराः सोदाहरणं वर्णिताः सन्ति।

यज्ञादिकार्ये ज्योतिषस्य का आवश्यकता तत्र कर्मकाण्डीयाः के प्रयोगाः सन्ति इत्यादीनाम् विवेचनम् अस्ति।

**पंचमेऽध्याये** एतयोः विषयोः समीक्षास्ति। तत्र वेदतः आरभ्य अद्यावधि ज्योतिषस्य स्वरूपं महत्वम् च कर्मकाण्डयोः परस्परम्

कोसम्बन्धः इत्यस्य शास्त्रीयविवेचनम्, पुराणेषु उभयोः किम् वैशिष्ट्यम् इति निरूपणम् अस्ति।

एतदरिक्तं परिशिष्टरूपेण आधारग्रन्थानाम् नामानि यथानियमं निर्धारितम्। मदीयो प्रभ्हीभूतो प्रयासः कीदृशः जातः इत्यस्य शोधप्रबन्धस्याध्ययनादेव भवितेति।